# First Terminal Evaluation - 2017

## First Language Part - I Sanskrit - Paper I

## SANSKRIT

(For Academic & Oriental Sanskrit Schools)

**STD - X**

Time - 1½ Hours

Total Score - 40

निर्देशा: -

* १५ निमेषा: समाश्वासकाल:। प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं काल: उपयोक्तव्य:।
* प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
* उत्तरलेखने मूल्याङ्का: काल: च परिगणनीया:।
* विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपि: उपयोक्तव्या।

**I .कोष्ठकात् चतुर्णां समुचितमुत्तरं निर्धार्य लिखत।** (4x1=4)

क. अश्विनीसुतौ कौ ? (सुख:दुखे , देववैद्यौ, आयुरारोग्ये)

ख. " जननी " इत्यस्य समानपदं किम्? (दीना, नन्दिनी, माता)

ग. सुखदु:खयो: कर्ता क: ? (आत्मा, मन:, वाक्)

घ. दशपुत्रसमो ................. । (मित्र:, द्रुम:, ह्रद:)

ङ. " स्वराज्यम् अस्माकं जन्माधिकार एव " कस्य वचनमिदम्?

(बालगङ्गाधरतिलकस्य, डा. एस्. राधाकृष्णस्य, महात्मागान्धिन:)

**II. यथोचितं योजयत ।** (4x1=4)

क. चरकसंहिता - महाभारतम्

ख. सुरभि: - वृक्ष:

ग. भगवद्गीता - धेनो: माता

घ. आम्र: - चरक:

**III.** उदाहरणानानुसारं विग्रहवाक्यं लिखत । (1x1=1)

उदा - देही - देहम् अस्य अस्तीति । धनी- . . . . . . . . . . . . . . . |

**IV.** शतृ-शानजन्तरूपाणि विविच्य लिखत । (3x1=3)

( नुद्यमानः , पीडयन्, ताडयन्, कम्पमानः, पचमानः , लिखन् )

**V-VI** एतयोः <u>एकस्य</u> उत्तरं लिखत । (1x 4=4)

**V.** सस्यप्रभेदान् अधिकृत्य सूचनानुसारं लघूपन्यासं लिखत ।

सूचनाः- सुरपालः - - वृक्षायुर्वेदः - - त्रयोदशाध्यायः - - तरुमहिमा - - बीजोत्पादनविधिः - - सस्यानां पोषणम् - - वृक्षः - - वनस्पतिः - वीरुत् - - ओषधिः ।

**VI** सूचनाः उपयुज्य के .आर् .नारायणस्य जीवनचरितं लिखत ।

| | | |
|---|---|---|
| नाम | : | कोच्चेरिल् रामन् नारायणन् । |
| जन्म | : | १९२० अक्तूबर १७ । |
| जन्मदेशः | : | उषवूर्, कोट्टयम् । |
| पितरौ | : | कोच्चेरिल् रामन् वैद्यः, पाप्पियम्मा च । |
| प्रशस्तिः | : | भारतस्य दशमः राष्ट्रपतिः । |
| मृत्युः | : | २००५ नवम्बर ९ । |

**VII** <u>त्रयाणाम्</u> औषधसस्यानां गुणान् लिखत। (3x1=3)

क) आमलकी

ख) हरिद्रा

ग) तुलसी

घ) निम्बः

**VIII.** अधोदत्तवाक्यात् सम्बोधनरूपं चित्वा लिखत। (1x1=1)

देवेन्द्रः ताम् एवम् असान्त्वयत् - " गच्छ वत्से! सर्वं भद्रं जायेत " इति ।

IX "अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकम्"-इति आशययुक्तं श्लोकं चित्वा लिखत । (2x1=2)

क) स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया ।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित् ।।

ख) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः ।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

X श्लोकं पठित्वा सूचनानुसारम् आशयं लिखत । (1x4=4)

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये ।।

**सूचनाः** - ऐतरेयब्राह्मणम् - व्यायामः - आहारमितत्वम् - देववैद्यौ - अन्यः वैद्यः - न आवश्यकम् ।

XI सस्यसंरक्षणम् इति विषये भित्तिपत्रिकां रचयत। (2x1=2)

XII पट्टिकां पूरयत । (3x1=3)

| लट् | लङ् | लोट् |
|---|---|---|
| अस्ति | ----- | अस्तु |
| पश्यति | अपश्यत् | -------- |
| ------- | अपृच्छत् | पृच्छतु |

**XIII. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** ( 5x1=5)

अद्वैतचिन्ताप्रतिष्ठापको भवति श्रीशङ्कराचार्यः। सः गुरुकुले वसन् सतीर्थ्यैः सह भिक्षार्थम् अटन् आसीत्। एकस्मिन् दिने कस्यचित् ब्राह्मणस्य गृहं प्रविवेश। तत्रत्यं दारिद्र्यं विज्ञाय तन्निवारणाय ऐश्वर्यदेवतां स्तवेनैकेन संस्तुतवान् ।

क. अद्वैतचिन्ताप्रतिष्ठापकः कः ?

ख. श्रीशङ्कराचार्यः कैः सह भिक्षार्थम् अटन् आसीत् ?

ग. लक्ष्मी इत्यर्थे प्रयुक्तं पदं लिखत ।

घ. रेखाङ्कितपदस्य पदच्छेदं लिखत ।

ङ. खण्डिकातः ल्यबन्तम् अव्ययं चित्वा लिखत ।

**XIV. प्रादेशिकभाषया विवर्तयत ।** (1x4=4)

भारतीयानां सर्वस्वभूता संस्कृतभाषा विदेशेष्वपि नितरां प्रसृता वर्तते। बहवो विदेशीयाः भारतम् आगत्य संस्कृतभाषां पठित्वा तां प्रचारयन्तः विश्वप्रसिद्धाः पण्डिताश्च अभवन् । तेषु प्रसिद्धः भवति अर्नोस् पातिरिः। संस्कृतभाषाप्रचारणे तस्य योगदानं सुविदितमेव ।

*** *** *** *** ***